| अथोपपातकानि। | प्रायश्चित्तानि। | तदशक्तौ धेनुदानम्। | तदशक्तौ चूर्णीदानम्। | दक्षिणा। |
|---|---|---|---|---|
| वैश्यवन्धकीगमनम्। | प्रतोददानम्। | ० | ० | यथाशक्ति। |
| शूद्रवन्धकीगमनम्। | स्नानपुरःसरप्राणायामः। | ० | ० | ० |
| | एतानि वन्धकीगमनप्रायश्चित्तानि सवर्णानुलोमप्रतिलोमविषयाणि ॥*॥ | | | |
| अथ व्युत्क्रमविवाहः। तत्र ब्राह्मणस्य प्रथमतः क्षत्रियादिविवाहः। | दारव्यतिक्रमी खराजिनं वहिर्लोम परिधाय दारव्यतिक्रमिणे भिक्षां देहीति सप्तागाराणि चरेत्। सा वृत्तिः षण्मासान्। दारव्यतिक्रमी ब्राह्मणक्षत्रियवैश्यकन्याविवाहमकृत्वा यो ब्राह्मणः शूद्राविवाहं करोति स उच्यते। एतदनापदि सकृदज्ञानविषयम्। | सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः। | २२॥० कार्षापणाः। | यथाशक्ति। |
| | आपदि त्वाह शातातपः। ब्राह्मणो राजन्यापूर्व्वो द्वादशरात्रं चरित्वा निर्व्विशेत् ताञ्चैवोपगच्छेत्। | १ धेनुः। | ३ कार्षापणाः। | यथाशक्ति। |
| | वैश्यापूर्व्वो तप्तकृच्छ्रम्। | सपादधेन्वसंभवात् २ धेनू। | ३॥० कार्षापणाः। | यथाशक्ति। |
| | शूद्रापूर्व्वो कृच्छ्रातिकृच्छ्रम्। | ५ धेनवः। | १५कार्षापणाः। | यथाशक्ति। |
| | अनापदि ज्ञानाभ्यासे मनूक्तं वार्षिकव्रतम्। | ४५ धेनवः। | १३५ कार्षापणाः। | २५ गावः। अशक्तौ २५ कार्षापणाः। |
| वैश्यागमनम्। | प्राजापत्यम्। | १ धेनुः। | ३ कार्षापणाः। | यथाशक्ति। |
| पश्चाधिकपुरुषगामिनी वेश्या | अभ्यासे चान्द्रायणम्। | ८ धेनवः। | २२॥०कार्षापणाः | यथाशक्ति। |
| रजस्वलागमनम्। | त्रिरात्रोपवासः। घृतप्राशनञ्च। एतत् कामतः सकृद्गमने। अभ्यासे तु द्वैगुण्यादिकम्। | ० | १॥० कार्षापणः। | यथाशक्ति। |
| ऋतौ भार्य्यानभिगमनम्। | त्रिरात्रोपवासः। | ० | १॥० कार्षापणः। | यथाशक्ति। |
| | ज्ञानाभ्यासे प्राजापत्यम्। | १ धेनुः। | ३ कार्षापणाः। | यथाशक्ति। |
| पर्व्वसु स्त्रीगमनम्। | एकोपवासः। | ० | ॥० पणाः। | यथाशक्ति। |
| श्राद्धदिने मैथुनम्। | एकोपवासः। | ० | ॥० पणाः। | यथाशक्ति। |
| दिवामैथुनम्। | एकाहं यावकपानम्। नग्नस्य स्नाने नग्नपरस्त्रीदर्शनेऽप्येवं प्रायश्चित्तम्। अभ्यासे प्रायश्चित्तावृत्तिः ॥*॥ | ० | ० | ० |
| अथ स्त्रीव्यभिचारः। | समोत्तमवर्णेसु सकृदुपगमे प्राजापत्यम्। | १ धेनुः। | ३ कार्षापणाः। | यथाशक्ति। |
| | द्विरभ्यासे पराकः। | ५ धेनवः। | १५ कार्षापणाः। | यथाशक्ति। |
| | त्रिरभ्यासे चान्द्रायणम्। | सार्द्धसप्तधेन्वसम्भवात्८धेनवः। | २२॥० कार्षापणाः। | यथाशक्ति। |
| अन्त्यजागमनम्। अर्थात् रजकचर्म्मकारनटवरुड़कैवर्त्तमेदभिल्लवेणुजीविशैलूषाणां स्त्रीषु गमनम्। | अज्ञानतश्चान्द्रायणम्। ज्ञानद्वैगुण्यम्। | सार्द्ध सप्तधेन्वसंभवात् ८ धेनवः। | २२॥० कार्षापणाः। | यथाशक्ति। |
| | चतुर्व्विंशतिवारगमने द्वादशवार्षिकव्रतम् एतदज्ञानतः। ज्ञानतो द्वैगुण्यम्। अव्यवहार्य्यता च। | १८० धेनवः। | ५४० कार्षापणाः। | १०० गावः। अशक्तौ १०० कार्षापणाः। |
| कापालिकस्त्रीगमनम्। | ज्ञानादब्दकृच्छ्रम्। | ३० धेनवः। | ९० कार्षापणाः। | यथाशक्ति। |
| | अज्ञानाच्चान्द्रायणद्वयम्। | १५ धेनवः। | ४५कार्षापणाः। | यथाशक्ति। |
| अथ तिर्य्यग्योनिगमनम्। तत्र गोवर्ज्जपशुगमनम्। | सचेलस्नानपूर्व्वकं गोभ्यो यवसभारदानम् इदं सकृद्गमने। | | | |
| गोगमनम्। | गोवधोक्तमासिकव्रतम्। एतत् सकृद्गमने। | ४ धेनवः। | १२ कार्षापणाः। | यथाशक्ति। |
| | अभ्यासे संवत्सरं प्राजापत्यम्। | ३० धेनवः। | ९० कार्षापणाः। | १७ गावः। अशक्तौ १६॥≠१६। कार्षापणाः। |